# PREFACE

As early as the study of the greater productions in Sanskrit began, interest in the minor works also arose. Side by side with editing and translating the major texts, early Indologists thought of bringing to light the short poems, plays, lyrics of love and devotion etc., the *laghu kāvyas* which were in abundance in Sanskrit literature, through collections of these published periodically.

The earliest effort in this line seems to be "The Neeti Sunkhulun' a collection of minor *Niti* works, in Bengali script (Serampore Press, 1831). The next is the well-known "*Kāvya-saṁgraha*, a Sanskrit anthology being a collection of best smaller poems in Sanskrit language" brought out by the missionary Dr John Hæberlin (W. Thacker & Co., Calcutta, 1847). In 1850, Giriscandra Vidyaratna brought out the *Śatakāvali* (Samkrita Press, Calcutta). In 1869, Dinanatha Nyayaratna re-published Hæberlin's anthologies; and based on the same and with some additions, Jivananda Vidyasagar brought out his *Kāvyasaṁgraha* in 1872 (2nd edition 1886; 3rd, 1888). Bholanatha Mukhopadhyaya compiled the *Kāvyaratnasārasamgraha* in 1876 (Kavitāratnākara Press, Calcutta).

The above ventures were from Calcutta. In Bombay, the first effort in this direction was the *Kāvyakalāpa* (Ganpat Krishnaji's Press, 1864). From the Gopal Narayan Co.'s Press, Bombay, appeared in 1887–1891 the series of minor works called the *Grantharatnamālā*. But the best known of all such serial publications of collections of minor works is the *Kāvyamālā Gucchakas* of the Nirnaya Sagar Press, Bombay, of which fourteen parts appeared, offering in all 131 works.

The *Pandit* (*Kāśi-vidyā-sudhānidhi*), Banaras, started in 1866, presented some shorter texts but it concentrated on Śāstraic works and longer treatises. Serial publications of critical editions of larger treatises were started in many centres in India and in fact that was one of the main forms that Sanskrit studies and research took at the turn of the present century and during its early decades.

After the last part of the *Kāvyamālā Gucchakas* in 1906, no sustained attention was bestowed on this line of work. This was also the time when new collections of Sanskrit manuscripts were being organised in Universities and Oriental Institutes, all of which threw up an enormous amount of minor poems, playlets, hymns, centuries of lyrics and reflective verses, short texts on poetics, prosody etc. Histories of Sanskrit literature which were written could not know all this continuous output in Sanskrit through the centuries and most of them confined their accounts to the period before the 12th or 13th century, with brief mention of stray or select works of the later centuries.

I had been advocating for long that Sanskrit manuscript libraries, in addition to their series of major Text-editions, should run their own Bulletins and publish therein the minor works in their collections. The Trivandrum (now Kerala) University Manuscripts Library, with which I had some association, adopted the suggestion and upto this day, the journal of this Library, the only one to keep to this plan so far, has been able to bring to light a considerable number of poems, plays, hymns etc. written by authors who flourished in Kerala or were patronised by the different royal houses in Kerala.

The Sanskrit Commission appointed by the Government of India devoted much attention to the question of manuscripts and their publication. The Central Sanskrit Institute (Kendrīya Samskrita Vidyāpīṭha), Tirupati, which is born out of the Commission's Report, has naturally the responsibility to carry out as many as possible of the Commission's recommendations coming within the purview of its work. This need to bring to light the large mass of short works lying in manuscripts was mentioned in the outline of work I presented at the first Convocation of the Vidyapeetha, which was addressed by the then Union Education Minister, Dr. K. Shrimali, and later my proposal to the Research Committee of the Institute to edit and bring out for the Institute, for this purpose, a periodical called *Malayamāruta* was endorsed by the members.

The plan of the *Malayamāruta* is the same as that of the *Kāvyamālā Gucchakas.* Short unpublished works, in the same fields covered by the latter, will be issued here. When more than

one manuscript of a short work, suitable for publishing here, is available, attempts will be made to present a collated, critical text. Bibliographical and historical data on the works and authors will be given very briefly in the footnotes, which may, where needed, include some explanatory notes also on the textual passages.

Each issue of the *Malayamāruta* is appropriately called a *Spanda* and in this, the inaugural number, nine short works have been offered. The volume opens with a *Stotra* on Gaṇapati in one of his rare forms considered especially efficacious. The second is a hymn from Kashmir to the supreme Mother Goddess, Mahārājñī, who is also the presiding deity of art and letters. The *Daśaślokī*, a poem on the state of Śivādvaita-realisation, is by Vidyācakravarttin, the well-known Śaiva teacher, poet and critic of the 14th century; it is from a manuscript in the Madras Government Oriental Manuscripts Library. The *Upadeśaśikhāmaṇi* of Tyāgarāja, in the manner of Śaṅkara's *Bhaja Govindam*, is included next; it is found in the Adyar Library and the Tanjore Maharaja Sarfoji Sarasvati Mahal Library, Tanjore, (Tanjore Descriptive Catalogue, Vol. XIII, No. 1745). The anonymous description of the six seasons *Ṣaḍṛtuvarṇana* is from the Sarasvati Mahal Library, Tanjore. The *Kavitāmṛtakūpa* of Gauramohana is based on a manuscript in the Madras Government Oriental Manuscripts Library; this compilation is reported to have been printed in Calcutta in 1826. The anonymous anthology of Subhāṣitas called *Narābharaṇa* is also taken from a manuscript in the Madras Government Oriental Manuscripts Library; the manuscript is defective but the collection contains many popular verses, and shows that, as in certain other branches of Sanskrit literature, in Subhāṣita also, which throve on the common man's tongue, a popular form of Sanskrit was in vogue. The *Somanāthaśataka* is by a well-known poet-musicologist; it is full of Śleṣa most of which I have explained in the footnotes. The concluding piece based on an unsatisfactory manuscript from Bikaner is the *Vibudhamohana*, depicting the *Vidvad-goṣṭhis* held in royal courts, by Harijīvana Miśra of the 17th century who specialised in composing Prahasanas; some more of these Prahasanas, the condition of their manuscripts permitting, will be offered in the subsequent issues.

Of these texts, the *Mahārājñīstava* and the *Upadeśaśikhāmaṇi* are based on more than one manuscript.

I would appeal to scholars, especially those who possess private manuscript collections or are working in manuscript libraries, to co-operate in this undertaking and send manuscripts or press-copies of short works for publication in the future numbers of the *Malayamāruta*.

May the fresh vivifying breath of the *Malayamāruta* bring to light and life the countless creations of the Sanskrit Muse slumbering in the corners of the manuscript libraries and contribute to the fuller appreciation and enjoyment of her endless expressions of beauty and profundity.

*Śivarātri*
18-2-1966

V. RAGHAVAN

# आमुखम्

संस्कृतसरस्वत्याः समुन्मेषो विकासः प्रभावश्च न केवलं उद्ग्रन्थेषु, महाकाव्यादिषु, अन्यासु विस्तृतासु रचनासु, किन्तु लघुषु ग्रन्थेषु, खण्डकाव्येषु, शतकेषु, स्तुतिषु, सुभाषितेषु, भाणप्रहसनप्रेक्षणकादिषु च दृश्यते। प्राचीनेऽपि काले महाकविप्रतिभाभिः खण्डकाव्येष्वपि लीलायितम्। भर्तृहर्यमरुमयूरादीनां शतकानि प्रसिद्धान्येव। अर्वाचीने तु काले कवीनां संरम्भः विशिष्य खण्डकाव्येषु बहुधा प्रचक्राम। अद्यतने काले संस्कृतपरिशीलकानां महाग्रन्थानां प्रकाशने यावान् संरम्भ आदितो बभूव, तावान् आदित एव जजागार लघुकाव्यानां संकलने समास्वादने च। हेबर्लिन्-विद्यासागरप्रभृतिभिः संपादिताः काव्यसङ्ग्रहाः गतशताब्द्या मध्ये उत्तरार्धे च कल्कत्तानगरीतः प्रकाशिताः। पश्चान्मुम्बापुर्यां प्रादुर्बभूवतुः ग्रन्थरत्नमाला, काव्यमाला गुच्छकरूपा च। संस्कृतविदुषां साहित्यरसिकानां च सुपरिचिता एव काव्यमालागुच्छकाः यत्र १३१ लघुग्रन्था मुद्रिताः। काव्यमालागुच्छकानां चतुर्दशो भागः १९०६-तमे वर्षे प्रकटितः। तदनन्तरमेतादृशं लघुग्रन्थप्रकाशनकार्यं विच्छिन्नमेव बभूव, तत्र कस्यापि श्रद्धा नोदियाय। अस्मिन्नेव समये हस्तलिखितमातृकानां मार्गणं, सञ्चयश्च भारते तत्र तत्र केन्द्रे प्रावर्तत। बृहतां ग्रन्थानां बहुकोशसंवादसंशोधनपूर्वं संस्करणं प्रकाशनं च संस्कृतोद्योगिनां मुख्यप्रवृत्तितया स्त्यायते स्म। किन्तु लघवो ग्रन्थाः परःशतमगणिता मातृकास्वेव शेरते स्म। क्वचित् हस्तलिखितकोशागारनिर्वाहकैः कैश्चित् लघुग्रन्थप्रकाशनार्थं प्रयत्न उपात्तः, यथा केरलेषु अनन्तशयनक्षेत्रे।

केन्द्रशासननियोजितेन संस्कृतायोगेन विचारितेषु विषयेषु अयमप्यन्यतमः यदस्य महतो हस्तलिखितग्रन्थराशेः प्रकाशनार्थं प्रयत्नविशेषः कार्य इति। आयोगापत्यभूतेन तिरुप्पति-केन्द्रीय-संस्कृत-विद्यापीठेन आयोगनिर्दिष्टानि संस्कृताभिवृद्धिकार्याणि यावत्संभवं यावच्छक्यं निर्वर्तनीयानि। एवं च विद्यापीठस्य यः प्रथमः समावर्तनमहोत्सवोऽभूत्, यत्र तदानींतनकेन्द्रीयशिक्षामन्त्रिणः डा० श्रीश्रीमालिमहोदयाः सन्निहिताः, तदा विद्यापीठकार्यकलापरूपरेखानिर्देशावसरे

इदमपि लघुग्रन्थप्रकाशनकार्यं सूचितम् । तदर्थं 'मलयमारुत'-नामा कश्चन काव्यमालागुच्छकानुसारी तदातदा प्रकाश्यमानः संग्रहो मया केन्द्रीय-विद्यापीठद्वारा संपिपादयिषित इति सदस्येभ्यो निवेदितं, तच्च तैरनुमोदितम् । तस्य 'मलयमारुतस्य' अयं प्रथमः स्पन्दः विदुषां रसिकानां च हृदयस्पर्शी नूनं तानुत्पुलकयिष्यतीति विश्वसिमि ।

काव्यमालागुच्छकेषु या रीतिरनुसृता सैव अस्मिन् मलयमारुतेऽनुसरिष्यते । खण्डकाव्य-लघुरूपक-शतक-स्तोत्र-सुभाषितप्रायं संस्कृतसाहित्यजातमत्र प्रकाशयिष्यते । यत्र कस्यापि लघुग्रन्थस्य एकाधिकाः मातृकाः सुलभाः, तत्र मातृकासंवादपुरस्सरं स लघुग्रन्थः सम्यक्संशोध्य मुद्रापयिष्यते । ग्रन्थतत्कर्तृविषये ज्ञायते चेद्वृत्तान्तः, सः अत्यन्तं संग्रहेण दास्यते । एवमेव च तत्र तत्र ग्रन्थपङ्क्तिवैशद्यार्थमपेक्षिता लघ्व्यः टिप्पण्यश्च ।

अस्मिन् प्रथमे स्पन्दे नव लघुग्रन्था उपहृताः । यथोचितं वरप्रसादिनः 'उच्छिष्टगणपतेः' 'स्तवेन' समारम्भः । तदनन्तरं वागधिष्ठात्र्या 'महाराज्ञ्याः' काश्मीरककृष्णकविकृतं 'स्तोत्रम्' । शिवाद्वैतानुभवशालिनी 'दशश्लोकी' १४-शतकीयस्य होय्सलास्थानविदुषो विद्याचक्रवर्तिनः कृतिस्तदनन्तरम् । पश्चात् श्रीशङ्कराचार्यकृतभजगोविन्दप्रतिरूपकतया त्यागराजकविना कृत 'उपदेशशिखामणिः' । 'षड्तुवर्णन'मज्ञातकर्तृकं तञ्जापुरस्थ-सरस्वतीमहाल-पुस्तकालयात् । गौरमोहनसङ्कलितः 'कवितामृतकूपः' मद्रपुरराजकीयहस्तलिखितकोशागारस्थां मातृकामालम्ब्य मुद्रितः; अयं सार्धशतकवर्षेभ्यः पूर्वं कल्कत्तानगरे मुद्रित इति श्रूयते । 'नराभरण'-नामा सुभाषितसंग्रहः पूर्वोद्दिष्टपुस्तकालयस्थमातृकातः उद्धृतः । 'सोमनाथशतकं' सङ्गीतलक्षणविदा कविना सोमनाथेन विरचितं सदुपदेशपरमन्ते भगवद्भक्तिपरं च । अन्ते सप्तदशशतकीयेन जयपुरास्थानकविना हरिजीवनमिश्रेण विरचितेषु पञ्चषेषु प्रहसनप्रायेषु एकाङ्करूपकेषु एकं 'विबुधमोहनं' नाम, यत्र तत्तच्छास्त्रसिद्धान्तचर्चापूर्वं साहित्यविद्यायाः पारम्यं प्रतिपाद्यते । एषु महाराज्ञीस्तोत्रस्य, उपदेशशिखामणेश्च आधारतया मातृकात्रयं मातृकाद्वयं चोपात्तम् ।

# अनुक्रमणिका


| | | | पृष्ठम् |
|---|---|---|---|
| १. | श्री-उच्छिष्टगणपतिमन्त्रमातृकास्तवः | ... | १–८ |
| २. | पण्डित-कृष्णकेन विरचितं श्रीमहाराज्ञीस्तोत्रम् | ... | ९–२१ |
| ३. | श्रीविद्याचक्रवर्त्तिविरचिता दशश्लोकी | ... | २२–२४ |
| ४. | श्रीत्यागराजविरचितः उपदेशशिखामणिः | ... | २५–२७ |
| ५. | षड्ऋतुवर्णनम् | ... | २८–३३ |
| ६. | श्रीगौरमोहनेन संकलितं कवितामृतकूपम् | ... | ३४–४६ |
| ७. | नराभरणम् | ... | ४७–८३ |
| ८. | सोमनाथकृतं सोमनाथशतकम् | ... | ८४–११२ |
| ९. | हरिजीवनमिश्रकृतं विबुधमोहनं प्रहसनम् | ... | ११३–१२७ |

क्लींकारसारसोद्य-

न्मकरन्दास्वादपेशलभ्रमरम् ।

कलभाननं कृपालुं

क्लींकारारामकल्पकं कलये ॥ २४ ॥

ग्लौंकारगोपुराग्र-

स्फूर्जद्बोधप्रकाशमणिदीपम् ।

ग्लौंकारकोशखड्गं

गजवदनं भावयामि गुरुमूर्तिम् ॥ २५ ॥

गम्भीरध्वनिमेनं

गगनानिलवह्निवारिगोत्राङ्गम् ।

गन्धर्वगीयमानं

गजवदनं भावयामि गर्वघ्नम् ॥ २६ ॥

घेमिति वर्णव्यक्तं

घनतरविघ्नौघवारणोद्युक्तम् ।

घण्टानादविलीना-

खिलभुवनं भावयामि कलभास्यम् ॥ २७ ॥

घेंकारघोषभीत-

स्फुटितब्रह्माण्डमण्डलोद्दण्डम् ।

घोरेतरस्वरूपं

गजवदनं भावयामि गूढार्थम् ॥ २८ ॥

## ॥ श्रीमहाराज्ञीस्तोत्रम्* ॥

॥ पण्डित-कृष्णकेन विरचितम् ॥

यां द्वादशार्कपरिमण्डितमूर्तिमेकां
सिंहासनस्थितिमतीमुरगात्रतां[1] च ।
देवीमनक्षरगतिमीश्वरतां प्रपन्नां
तां नौमि भर्गवपुर्षी परमार्थराज्ञीम्[3] ॥ १ ॥

यत्पादपङ्कजतलेऽमरमूर्धमौलि-
न्यस्तेन्द्रनीलमणिसंततयः श्रयन्ति ।
किञ्जल्कपानरतमुग्धमधुव्रतत्वं
राज्ञी सदा भगवती जननीव नोऽव्यात् ॥ २ ॥

---

*पुण्यपत्तनस्थभाण्डारकरसंशोधनसमितिस्थां (४५६-९८८७-९१), तथा अडयार्-कोशागारस्थां, तथा देहलीस्थ-राष्ट्रीयपुरातत्त्ववस्तुसंग्रहालय (National Museum)-स्थितां मातृकां चावलम्ब्य सम्पादितम्। पु=पुण्यपत्तनमातृका। अ=अड्यार्-मातृका। दे=देहलीमातृका। तिस्रोऽपि प्रायः अशुद्धाः ॥

महराज्ञी नाम देव्या मूर्तिविशेषः काश्मीरैरुपास्यमानः, यस्य प्रादुर्भावः काश्मीरे तूलमूल्य (तुल् मुल्)-नाम्नि तीर्थे बभूवेति प्रसिद्धिः। स्टैन्-महाशयेन राजतरङ्गिण्यनुवादे (४. ६४०) प्रस्तावितोऽयं विषयः। जम्बू-रघुनाथमन्दिरपुस्तकालयस्थे भृङ्गीशसंहितान्तर्गते महाराज्ञीप्रादुर्भावनाम्नि ग्रन्थे तस्याः कथा वर्णिता। महाराज्ञी-कवचपञ्चाङ्गादिमातृकाश्चोपलभ्यन्ते। श्रीनगरे प्रकाशिते देवीरहस्यनाम्नि ग्रन्थे अन्ते परिशिष्टे (पृ. ४४३-४८) महाराज्ञ्याः पटल-पूजा-कवच-सहस्रनाम-स्तोत्राणि मुद्रितानि। तत्र ४६१ पृष्ठे अत्र मुद्र्यमाणस्तवस्यैवोपक्रमश्लोको मुद्रितो दृश्यते। कविश्चास्य स्तवस्य नूनं काश्मीरकः, प्रायोऽर्वाचीनः स्यादिति भाति।

१. अ. गैर्वृतां दे. गघ्रतां २. पु. न्य. ३. अ. परमातृरूपाम्।

षड्भिर्मुखैर्गजमुखास्यकृतानुचर्यैः
स्तौतीक्षते च नयनप्रकरैः कुमारः ।
यां द्वादशार्कवपुषीं धृतसप्तसप्ति-
वाहां निवारयतु भक्तभयानि राज्ञी ॥ ५३ ॥

पथ्यं भिषग्भिरनधीतचरं समस्तै-
र्दूरं महौषध[1]गणाच्च यदङ्घ्रिसेवा ।
दुर्वाररोगगुरुभारजुषां जनानां
राज्ञी विनाशयतु भक्तजनामयं सा ॥ ५४ ॥

रम्भामुखं भवति नैव सुखाय जन्तो-
र्यद्भक्तिवारवनिताबहुभोगभाजः ।
सा दुष्टपूर्वजननान्तरसंचितानि
राज्ञी विचूर्णयतु[2] मे दुरितानि नित्यम् ॥ ५५ ॥

मान्यं पदं समुपयाति सुवन्दिवक्त्र-
[3]सत्स्थावरावनिसमर्पितकीर्तिबीजः ।
यो नित्यमर्चति तवाङ्घ्रिमनन्यकर्मा
हे राज्ञि मातरशुभात्परिपाहि सा माम् ॥ ५६ ॥

[4]अर्थान् प्रकाशयति दीपशिखेव दीप्रा
या ध्यायिनां दहति पापपतङ्गपङ्क्तिम् ।
ध्यानाभिधं किरति कज्जलजालमक्ष्णो-
रंहो हिनस्तु मम सा प्रणतस्य राज्ञी । ५७ ॥

---

१. अ. दे. धि  २. अ. विमूलयतु; पु. विघूर्णयतु।  ३. अ. सद्भावरावनि। 'सद्भावनावनि' इति अ. पाठस्स्यात्।  ४. अ. अक्षान्

## ॥ उपदेशशिखामणिः* ॥

### ॥ श्रीत्यागराजविरचितः ॥

भज गौरीशं भज गौरीशं भज गौरीशं मुग्धमते ।
भज गौरीशं भज गौरीशं भज गौरीशं मुग्धमते ॥ १ ॥ भज ॥

सत्यं वद रे धर्मं चर रे कृत्याकृत्यविचारं कुरु रे ।
कालो याति गृहीत्वा देहं व्यर्थं मा कुरु मानुषजन्म ॥ २ ॥ भज ॥

पृष्ठे तिष्ठति मरणव्याघ्रः पुरतस्तिष्ठति जन्मश्वभ्रम् ।
पार्श्वे तिष्ठति नक्रजरा ते व्याधिव्यालो गिलति शरीरम् ॥ ३ ॥ भज ॥

कामव्याधो देहारण्ये तिष्ठति मानसहरिणं हर्तुम् ।
तं जय शत्रुं नो चेत्त्वामपि बध्वा नेतुं शक्तो भवति ॥ ४ ॥ भज ॥

दुर्जनसङ्गं मा कुरु मा कुरु दारदपादप[1]मिव दुष्फलदम् ।
कष्टं कष्टं चिन्तय चिन्तय कलिमलनरके मग्नो भवसि ॥ ५ ॥ भज ॥

[illegible] वह्निर्हेतुर्धूमः पक्षः शैलो मा कुरु तर्कम् ।
तत्त्वं ध्यात्वा (तत्साध्यस्त्वां) दहति तदानीं नाप्यनुमानं प्रत्यक्षं हि ॥ ६ ॥
भंज ॥

---

* अडयार्-कोशागारस्थमातृकातः । कृतिरेषा श्रीशङ्कराचार्याणां 'भज गोविन्दं भज गोविन्दम्' इत्युपक्रममाणां मोहमुद्गराख्यां कृतिमनुकरोति । तञ्जापुरे सरस्वती-महाल्पुस्तकालये च मातृकान्तरं वर्तते; तत्सूच्यां १३-भागान्ते दृश्यताम् ।

१. विषवृक्षमित्यर्थः



R. SK. S. LIBRARY
Acc. No. 1375
Class No. ..........

मृतसंजीवनगुटिका रक्षति कालान्नापि भिषग्वरपथ्यम् ।
मृत्युंजयपदभक्तिं कुरुषे यदि तं तीर्त्वा नित्यो भवसि ॥ ७ ॥ भज ॥

जाया पुत्रा द्रव्यपरास्ते नष्टे द्रव्ये वृद्धत्वे त्वम् ।
ज्ञास्यसि तेषां कृत्यं श्रद्धां शेषाः किमु वद विहितं कर्तुम् ॥ ८ ॥ भज ॥

अष्टैश्वर्यप्रभुरपि वित्तं कष्टं ज्ञात्वा त्यक्ततदाशः ।
भिक्षार्थमरे चरति स्थाणुर्भयरहितं तं पश्य मुमुक्षो ॥ ९ ॥ भज ॥

मायामेघः पीत्वा वर्षति भवजलधेस्तद्विषयविषाक्तम् ।
नीरं स्वप्नेऽपि त्वं न स्मर नो चेद्दोषज्वरवान्भवसि ॥ १० ॥ भज ॥

मायावेश्या वञ्चयति त्वां विषयाभिनयैर्विश्वविलासैः ।
प्रज्ञानधनं पालय नित्यं तां प्रति विमुखो भव मुक्तोऽसि ॥ ११ ॥ भज ॥

दृश्यं सर्वं नश्वरमेतद्भावय सततं ज्ञाते तत्त्वे ।
सत्यज्ञानानन्दब्रह्म त्वमसीत्येवं श्रुतिरपि पठति ॥ १२ ॥ भज ॥

नाभीकन्दे भुजगी[२] सुप्ता तामुत्थापय मरुदायामैः[३] ।
ऊर्ध्वं गत्वा वर्षत्यमृतं दशशतकमलात्तं[४] पिब नित्यम् ॥ १३ ॥ भज ॥

प्राणस्पन्दाच्चित्तविकारश्चित्तविकाराद्विषयासक्तिः ।
विषयासक्त्या विविधगतिस्ते तस्मात्प्राणनिरोद्धा भव रे ॥ १४ ॥ भज ॥

चिन्तय साम्बं चिन्मयदेवं संचितकर्म त्वत्तो गच्छति ।
पञ्चनदीनां नाथोऽसि त्वं प्रणतो भव रे परमशिवाङ्घ्रौ ॥ १५ ॥ भज ॥

---

२. कुण्डलिनी । ३. प्राणायामैः । ४. सहस्रारकमलात्तम् ।

कलमाः पाकविनम्रा मूलतलाघ्रातसुरभिकह्लाराः ।
पवनाकम्पितशिरसः प्रायः कुर्वन्ति परिमलश्लाघाम् ॥ २५ ॥

आयातं शरदाहो[6] शरदाहो[7] मान्मथः प्रबलः ।
गगनं [8]सरुचिरतारं [9]सरुचिरतारम्भकृद्दूरे ॥ २६ ॥

काननमलिनादमयं मलिना दमयन्ति मां मधुपाः ।
सखि न स चिरमपि सदयो[10] मयि [11]सदयोघटितहृदयोऽभूत् ॥ २७ ॥

॥ अथ हेमन्त(शिशिर)[12]वर्णनम् ॥

अम्बरमेष रजन्यै प्रेयस्यै वासरः प्रेयान् ।
अधिकं ददौ निजाङ्गादथ सङ्कुचितः स्वयं तस्थौ ॥ २८ ॥

लज्जाः प्रौढमृगीदृशामिव नवस्त्रीणां नरेच्छा इव
स्वैरिण्या नियमा इव स्मितरुचः कौलाङ्गनानामिव ।
दम्पत्योः कलहा इव प्रणयिता वाराङ्गनानामिव
प्रादुर्भूय भवन्ति नैव सहसा हैमन्तिका वासराः ॥ २९ ॥

कन्याप्रजातस्य धनुःप्रसङ्ग-
प्रभाविभागाहितवैभवस्य ।
धनञ्जयाधीनपराजयस्य
कर्णस्य शीतस्य च नास्ति भेदः ॥ ३० ॥

---

६. शरदा अहो आयातम् । ७. मान्मथः मन्मथसम्बन्धी शरदाहः तद्बाणकृतो दाहः, तापः । ८. रुचिरताराभिः सहितम् । ९. सरुचि रुचिसहितं रतं, सुरतं तस्यारम्भकृत् । १०. दयया सहितः; दयित इति शेषः । ११. सद्-अयोघटितहृदयः कठिनहृदय इति यावत् । १२. मातृकायां शिशिरपदं लुप्तम् ।

आयाता हिमरजनी यत्र न दीनो विधिर्मदनः ।
प्रतिगृहमर्धमृगाक्षीपुरुषमयीं[११] सृष्टिमातनुते ॥ ३१ ॥

निर्दग्धाः कमलाकराः सुमनसो मम्लुः कलावानपि
प्रीतो नो खलु, कृष्णवर्त्मनि जनः प्रायेण बद्धादरः ।
जाड्यं चोल्लसितं त्वगात्सुमहती मित्रेऽपि यन्मन्दता
तन्मन्ये कलिरेष दुस्सहतया शीतर्तुना स्पर्धते ॥ ३२ ॥

आपृच्छन्ते मलयजतरूनास्वदन्ते च वल्ली-
राभाषन्ते चिरपरिचितान्मन्दभव्यानिलौघान् ।
अध्यास्यन्तो द्रविडमहिलामन्दिरेषु प्रभाते
निर्यातारो मलयमरुतः कुर्वते संविधानम् ॥ ३३ ॥

वसन्तसंधौ धमितेऽपि वायुना
वियोगवह्नौ मदनेन मन्त्रिणा ।
हुतो रविस्नेहदृढप्रवर्धने
स एष होतुर्महिमा विजृम्भते ॥ ३४ ॥

जातं दम्पतिचेतसोर्विनिमयं विज्ञाय विज्ञा सती
व्रीडान्योन्यमसंस्तुतेतरजनस्पर्शाद्ध्रुवं बिभ्यती ।
निर्याता खलु तद्विमुक्तसकलस्त्रीपुंससंघस्ततो
वाक्यं हास्यकरं वदत्यविरतं मासे सहस्ये वशः ॥ ३५ ॥

॥ इति षड्तुवर्णनं समाप्तम् ॥

---

११. गाढं संश्लिष्टत्वाद् अर्धनारीपुरुषरूपेण सर्वौ स्त्रीपुंसौ जातौ इत्यर्थः ।

5

## ॥ कवितामृतकूपम्* ॥

॥ श्रीगौरमोहनेन संकलितम् ॥

अथ सार्थकनानाविषयकश्लोकाः ।

प्रत्यक्षं वा परोक्षं वा कस्यचिन्नाप्रियं वदेत् ।
शुद्ध(शुष्क)वैरं विवादं च न कुर्यात्केनचित्सह ॥ १ ॥

न वाच्यं प्रणयेनापि वचनं परतापि यत् ।
अहिंसा सततं कार्या धार्या चेतस्यनित्यता ॥ २ ॥

अपमानं पुरस्कृत्य मानं कृत्वा च पृष्ठतः ।
स्वकार्यमुद्धरेत्प्राज्ञः कार्यध्वंसे च मूर्खता ॥ ३ ॥

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् ॥ ४ ॥

उन्मत्तानां भुजङ्गानां मद्यपानां च हस्तिनाम् ।
स्त्रीणां राजकुलानां च विश्वसेयुर्गतायुषः ॥ ५ ॥

दारिद्र्यं यौवने यस्य शैशवे मातृहीनता ।
वार्द्धक्ये पुत्रहीनत्वं जीवितं तस्य निष्फलम् ॥ ६ ॥

हीयते हि मतिस्तात हीनैस्सह समागमात् ।
समैश्च समतां याति विशिष्टैश्च विशिष्टताम् ॥ ७ ॥

---

*मद्रपुरी-राजकीयकोशागारस्थमातृकात: । नानाकविकृतिभ्यः संकलितमिदम् ।

अथ खलपद्धतिः

अन्तर्मलिनदेहेन बहिराह्लादकारिणा ।
महाकालफलेनेव कः खलेन न वञ्चितः ॥ ८ ॥

आखुभ्यः किं खलैः ज्ञातं खलेभ्यश्च किमाखुभिः ।
अन्यत्परगृहोत्खातात्कर्म येषां न विद्यते ॥ ९ ॥

नौका च खलजिह्वा च प्रतिकूलप्रवर्तिनी ।
प्रतारणाय लोकानां दारुणा केन निर्मिता ॥ १० ॥

स्वभावकठिनस्यास्य कृत्रिमां बिभ्रतो नतिम् ।
गुणोऽपि परहिंसायै चापस्य च खलस्य च ॥ ११ ॥

खलानां कण्टकानां च द्विविधैव प्रतिक्रिया ।
उपानन्मुखभङ्गो वा दूरतो वा विवर्जनम् ॥ १२ ॥

सिंहव्याघ्रभुजङ्गानाम् अन्येषां पापकर्मणाम् ।
मनोरथा न सिध्यन्ति तेन जीवन्ति मानवाः ॥ १३ ॥

सुगृहीतमलिनपक्षा लघवः परभेदिनस्तीक्ष्णाः ।
पुरुषा अपि विशिखा अपि गुणच्युताः कस्य न भयाय ॥ १४ ॥

द्विचरणपशुषु भ्रातर्ना(र्मा)दर्शय (तव ?) गुणानेतान् ।
पशवोऽन्ये गुणसाध्याः खादन्त्येते गुणानेव ॥ १५ ॥

वक्राः कपटस्निग्धा मलिनाः कर्णान्तिके प्रसज्जन्तः ।
कं वञ्चयन्ति न सखे खलाश्च गणिकाकटाक्षाश्च ॥ १६ ॥

हालाहलमपि पीतं बहुशो भिक्षाऽपि भिक्षिता भवता ।
अनयोरवगतरसयोश्शङ्कर कियदन्तरं कथय ॥ ४६ ॥

धनैर्निष्कुलीनाः कुलीनाः क्रियन्ते
धनैरापदो मानवा निस्तरन्ति ।
धनेभ्यो न कश्चित्सुहृद्विद्यतेऽन्यो
धनान्यार्जयध्वं धनान्यार्जयध्वम् ॥ ४७ ॥

मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्येण द्विजमादरेण युवतिं प्रेम्णा गुणैर्बान्धवान् ।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं शीलेन कुर्याद्वशम् ॥ ४८ ॥

विद्वान् संसदि पाक्षिकः परिणतो मानो दरिद्रो गृही
द्रव्यौघः कृपणः सुखी परवशो वृद्धो न धर्माश्रितः ।
राजा दुस्सचिवप्रियः कुलभवो मूर्खः पुमान् स्त्रीजितः
वेदान्ती हतसत्क्रियः किमपरं हास्यास्पदं भूतले ॥ ४९ ॥

क्षान्तिश्चेत् कवचेन किं किमरिभिः कोपोऽस्ति चेद्देहिनां
ज्ञातिश्चेद् अनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ।
सर्पैः किं यदि दुर्जनः किमु धनैर्विद्याऽनवद्या यदि
व्रीडा चेत् किमु भूषणैस्सुकविता यद्यस्ति राज्येन किम् ॥ ५० ॥

दुर्मन्त्रान्नृपतिर्विनश्यति यतिस्सङ्गात् सुतो लालनात्
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
मैत्री चाप्रणयात्समृद्धिरनयात्स्नेहः प्रवासाश्रयाद्
ह्रीर्मद्यादनवेक्षणादपि कृषिस्त्यागात्प्रमादाद्धनम् ॥ ५१ ॥

साधि (ध्वी ?) स्त्रीणां दयितविरहे मानिनां मानभङ्गे
सच्छ्लोकानामपि जनरवे निर्गुणानां विदेशे ।
अन्यैश्वर्ये कुटिलमनसां निग्रहे पण्डितानां
भृत्याभावे भवति मरणं तद्धि संभावितानाम् ॥ ५२ ॥

कश्शूरो विजितेन्द्रियः, प्रियतमा का सुव्रता, किं धनं
विद्या, किं सुखमप्रवासपरता, राज्यं किमाज्ञाफलम् ।
लाभः को गुणिसङ्गमः, किमशुभं प्राज्ञेतरोपाश्रयः,
का हानिर्विनयच्युतिः, निपुणता का धर्मतत्त्वे रतिः ॥ ५३ ॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैंवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ५४ ॥

उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीस्स्वयं याति निवासहेतोः ॥ ५५ ॥

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ ५६ ॥

उद्योगेन विना नैव कार्यं किमपि सिध्यति ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ५७ ॥

दोषभीतेरनारम्भस्तत्कापुरुषलक्षणम् ।
कैरजीर्णभयाद्भ्रातर्भोजनं परिहीयते ॥ ५८ ॥

एकमेव पुरस्कृत्य दश जीवन्ति मानवाः ।
विना तेन न शोभन्ते यथा सङ्ख्याङ्कबिन्दवः ॥ ५९ ॥

मीनस्स्नानपरः, फणी पवनभुक्, मेषश्च पर्णाशनो
गर्ते तिष्ठति मूषिकोऽपि, विपिने सिंहो, बको ध्यानवान् ।
शश्वद्भ्राम्यति चक्रिगौः, परिचरन् दैवः (देवं?) सदा देवलः
किं तेषां फलमस्ति तेन तपसा, तद्भावशुद्धिं कुरु ॥ ६० ॥

फलाशी मूलाशी सलिलपवनाशी निवसनो
जनो रागद्वेषादुपहतमनास्साध्यति (स्याद्यदि ?) मुनिः ।
कपीनां कोलानामनिमिषदृशां किंच फणिनां
गिरीणां को भेदश्शिव शिव समानव्रतभृताम् ॥ ६१ ॥

वनेऽपि दोषाः प्रभवन्ति रागिणां गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते निवृत्तरागस्य गृहं तपोवनम् ॥ ६२ ॥

वपुः कुब्जीभूतं गतिरपि तथा यष्टिशरणा
विशीर्णा दन्तालिश्श्रवणविकलं श्रोत्रयुगलम् ।
शिरश्शुक्लं चक्षुस्तिमिरपटलैरावृतमहो
मनो मे निर्लज्जं तदपि विषयेभ्यस्स्पृहयति ॥ ६३ ॥

जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
धनाशा जीविताशा च जीर्यतोऽपि न जीर्यति ॥ ६४ ॥

शत्रवो ज्ञातयश्चैव लाभं पश्यन्ति न व्ययम् ।
आयं व्ययं च मध्यस्था व्ययमेव सुहृज्जनाः ॥ ६५ ॥

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ६६ ॥

सुहृदां हितकामानां यश्शृणोति न भाषितम् ।
विपत्सन्निहिता तस्य स नरश्शत्रुनन्दनः ॥ ॥ ६७ ॥

द्वेष्योऽपि सम्मतश्शिष्टः आर्तस्येव (तस्यार्तस्य) यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥ ६८ ॥

यदिच्छसि वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्येभ्यो गां चरन्तीं निवारय ॥ ६९ ॥

अलभ्यं लब्धुकामस्य जनस्य गतिरीदृशी ।
अलभ्येषु मनस्तापस्सञ्चितार्थो विनश्यति ॥ ७० ॥

अशक्ताश्शक्तिमात्मीयां श्लाघन्ते ये च दुर्जनाः ।
ते भवन्त्यपहासाय महतामेव सन्निधौ ॥ ७१ ॥

अक्षमः क्षमतामानी यः क्रियायां प्रवर्तते ।
स हि हास्यास्पदं चापि लभते प्राणसंशयम् ॥ ७२ ॥

समये सुहृदस्सर्वे सुखसम्पत्तिलिप्सया ।
विपत्काले च सुहृदः स्वाङ्गान्यपि च नात्मनः ॥ ७३ ॥

न किंचित्सहसा कार्यं कार्यं कार्यविदा क्वचित् ।
क्रियते चेद्विविच्यैव तस्य श्रेयः करस्थितम् ॥ ७४ ॥

दुष्टेन साक्षिभूतेन न नरश्शुद्धिमृच्छति ।
न हि पङ्काम्भसा क्षालाद्वासो वै शुद्धिमाप्नुयात् ॥ ७५ ॥

मौढ्येन विपदापन्नं मध्यस्थं सुहृदं तथा ।
शक्त्या ततस्समुद्धृत्य हितार्थं भर्त्सयेत्सुधीः ॥ ७६ ॥

गते हि दुर्दशां लोके क्षुद्रोऽप्यहितमाचरेत् ।
पङ्के निमग्ने करिणि भेको भवति मूर्द्धगः ॥ ७७ ॥

मूर्खो हि जल्पतां पुंसां श्रुत्वा वाक्यं शुभाशुभम् ।
अशुभं वच आदत्ते पुरीषमिव सूकरः ॥ ७८ ॥

प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाक्यं शुभाशुभम् ।
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवाम्भसः ॥ ७९ ॥

अन्यान्परिवदन् साधुर्यथा हि परितप्यते ।
तथा परिवदन्नन्यांस्तुष्टो भवति दुर्जनः ॥ ८० ॥

अभिवाद्य यथा वृद्धान् सन्तो गच्छन्ति निर्वृतिम् ।
तथा सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥ ८१ ॥

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनि ॥ ८२ ॥

सर्वहिंसानिवृत्ता ये नरास्सर्वसहाश्च ये ।
सर्वस्याश्रयभूता ये ते नरास्स्वर्गगामिनः ॥ ८३ ॥

दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारश्शीतः कृष्णायते करम् ॥ ८४ ॥

कर्तव्यानि च मित्राणि दुर्बलानि बलानि च ।
पश्य कूर्मपतिर्बद्धो मूषिकेण विमोचितः ॥ ८५ ॥

स्नेहच्छेदेन साधूनां न गुणा यान्ति विक्रियाम् ।
भङ्गेऽपि हि मृणालानामनुबध्नन्ति तन्तवः ॥ ८६ ॥

अन्यथैव हि सौहार्दं भवेच्छुद्धान्तरात्मनः ।
प्रवर्ततेऽन्यथा वाणी शाठ्योपहतचेतसः ॥ ८७ ॥

न मातरि न दारेषु न सोदर्ये न चात्मजे ।
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे ॥ ८८ ॥

शोकारातिभयत्राणं प्रीतिविश्रम्भकारणम् ।
केन सृष्टमिदं रत्नं मित्रमित्यक्षरद्वयम् ॥ ८९ ॥

परोऽपि हि हितो बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजव्याधिर्हितमारण्यमौषधम् ॥ ९० ॥

यस्स्वभावो हि यस्य स्यात्स तस्य दुरतिक्रमः ।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम् ॥ ९१ ॥

पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥ ९२ ॥

कार्यकाले विपत्तौ हि यो भृत्यो याचते धनम् ।
सोत्सारणीयस्सपदि नीतिज्ञावनिपालकैः ॥ ९३ ॥

आपद्युन्मार्गगमने कार्यकालात्ययेषु च ।
अपृष्टेनापि भृत्येन वक्तव्यं भूतिमिच्छता ॥ ९४ ॥

साधोः प्रकुपितस्यापि न गुणा यान्ति विक्रियाम् ।
न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥ ९५ ॥

परोपदेशे पाण्डित्यं सर्वेषां सुकरं भवेत् ।
धर्मे स्वयमनुष्ठानं कस्यचित्तु महात्मनः ॥ ९६ ॥

